Postal Regd.No. GAMC- 1553/2022-2024
ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")
(संस्कृतमासिकी पत्रिका)
वर्ष : १७ अङ्क : १९८
नवेम्बर - २०२२
EKLAVYA SANSKRIT ACADEMY
Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### विष्णोः सर्जिकलस्ट्राइक

महाभारते शान्तिपर्व कश्चित् उपदेशात्मकः ज्ञानात्मकः वा खण्डः वर्तते। समयाभावात् दारिद्र्यम् अनुभवन् मनुष्यः सम्पूर्णं ग्रन्थम् अध्येतुं न शक्नुयात् चेत् तेन शान्तिपर्व निश्चयेन अध्येतव्यम्।

अस्मिन् पर्वणि काचित् नातिप्रसिद्धा कथा वर्तते। प्रारम्भे युधिष्ठिरः भीष्माय निवेदयति यत् अहं श्रीकृष्णस्य माहात्म्यं ज्ञातुम् इच्छामि। तत्रापि श्रीकृष्णः स्वयं प्रभुः सन् अपि तिर्यग्योनिं (वराहरूपं) कथं धृतवान् इति मम जिज्ञासा वर्तते। तदानीं भीष्मः कथयति यत् पूर्वम् अहं वने मुनेः मार्कण्डेयस्य आश्रमे कञ्चित् कालं विश्रामार्थम् उषितवान्। तत्र महर्षिणा कश्यपेन एषा दिव्या कथा उक्ता। युधिष्ठिर! भवान् तां कथां सावधानं शृणोतु।

पुरा नरकासुरादयः शतशः दानवमुख्याः बलेन मत्ताः अभवन्। देवानां समृद्धिम् असहमानाः ते युद्धे मतिं चक्रुः। दानवैः पीड्यमानाः देवाः देवर्षयश्च आत्मरक्षणाय अत्र तत्र लीयन्ते स्म। एवं व्याकुलां पृथिवीं विलोक्य देवाः ब्रह्माणम् उपसृत्य तम् उक्तवन्तः – 'ब्रह्मन्! वयं दानवैः क्रियमाणं मर्दनं सोढुं कथं शक्नुमः?' ब्रह्मा अपि तान् आश्वासयन् उक्तवान् यत् मया उपायः चिन्तितः एव वर्तते। तदनुगुणं भगवान् श्रीविष्णुः वराहस्य रूपं धृत्वा तान् राक्षसान् संहरिष्यति। ब्रह्मणः वचनेन हृष्टाः देवाः निवृत्ताः।

ततः भगवान् विष्णुः वाराहं रूपं धृत्वा सन्नद्धः अभवत्। सः भूमेः अन्तः वेगेन प्रविश्य दैत्यानां वसतिं प्राप्तवान्। कालमोहिताः दैत्याः अपि एतत् अलौकिकम् अमानुषं सत्त्वं विलोक्य, सर्वे सम्मिल्य प्रतिकारं कर्तुं पुरतः स्थिताः अभवन्। संक्रुद्धाः ते आक्रमणं कृत्वा, वराहं गृहीत्वा, सर्वतः कर्षणं कृतवन्तः। महाकायाः सन्तः अपि दैत्याः वराहस्य कामपि क्षतिं कर्तुं न शक्ताः। ततः तेषु विस्मयं भयं च उत्पन्नम्। ते स्वीयं जीवनं सङ्कटग्रस्तं दृष्टवन्तः।

अथ देवाधिदेवः भगवान् योगम् आस्थाय महानादं चकार। तेन दैत्याः भृशं क्षुभिताः। न तावत्, सकलं जगत् विमोहितम् इव अभवत्। ततः भीताः दैत्याः निष्प्राणाः भूत्वा धरणीतले अपतन्। सकलं राक्षसकुलम् उन्मूलयितुकामः वराहः रसातलं गत्वा तान् राक्षसान् खुरैः विदारयामास। तेषां मांसैः, मेदोभिः अस्थिभिः च बृहन् राशिः अभवत्।

'सनातन' शब्दस्य कल्पना अपि तदानीम् एव अभूत्। भगवान् विष्णुः वराहरूपेण महानादं कृतवान्। अतः तस्य नाम 'सनादनः' (नादेन सहितः) अभवत्। व्यतीते काले मनुष्याणां जिह्वायाः चापल्येन दकारस्य स्थाने तकारः उपविष्टः! तेन कारणेन विष्णोः नाम 'सनातनः' अभवत्।

**नादेन तेन महता सनातनः इति स्मृतः। पद्मनाभो महायोगी भूताचार्यः स भूतराट्॥**

# धर्मबोधकेन प्राप्तः बोधः

पूर्वं कश्चन धर्मोपदेशकः आसीत्। स्वस्य मतस्य प्रसारविषये तस्य विशेषासक्तिः। देशात् देशान्तरं गच्छन् सः – 'प्रार्थना कथं करणीया' इति जनान् बोधयति स्म। तस्य देशस्य राजा एतस्य धर्मोपदेशकस्य कार्यशैलीं दृष्ट्वा नितरां प्रभावितः जातः। मतप्रसारः, प्रार्थनापद्धतेः बोधनं च तस्यापि प्रियम् एव आसीत्। अतः दूरस्थान् देशान् अपि गन्तुम् आनुकूल्यं यथा स्यात् तथा एकां नौकां दत्तवान् सः तस्मै धर्मोपदेशकाय।

कदाचित् प्रयाणं समाप्य राजधानीं प्रति आगमनसमये नौकाचालकः धर्मोपदेशकम् अवदत् – "श्रीमन्! अत्र समीपे एव कश्चन द्वीपः अस्ति। तत्र त्रयः परिव्राजकाः निवसन्ति। कदाचित् पानजलस्य सङ्ग्रहाय तं द्वीपं गतः अहं तान् दृष्टवान् आसम्। ते आगन्तुकैः सह विरलतया एव सम्भाषन्ते। ध्यानं प्रार्थनां च कुर्वन्तः ते मौनेन एव तिष्ठन्ति सदापि" इति।

"एवं तर्हि तेषां साहाय्यं करणीयम् एव अस्माभिः" इति वदन् सः नौकाचालकम् अपृच्छत् – "किं भवान् मां तत्र नेतुम् अर्हेत्?" इति। "भवान् यथा वदति तथा आचरणं मम कर्तव्यम्" इति अवदत् नौकाचालकः।

ततः नौका तं द्वीपं प्रति गता। तत्र त्रयः वृद्धाः दृष्टाः। वायुकारणतः तेषां श्मश्रु इतस्ततः सञ्चरति स्म। अल्पवस्त्रधारिणः आसन् ते। ते नौकाम् एव आश्चर्येण पश्यन्ति स्म। तेषां दर्शनात् धर्मोपदेशके करुणा उत्पन्ना। सः तान् अवदत् – "भवत्सु भगवतः दया अस्ति। अतः एव तेन अहम् अत्र प्रेषितः प्रार्थनाक्रमस्य बोधनाय" इति। तेन किम् उक्तम् इति अनवगच्छन्तः ते त्रयः अपि परस्परं मुखं दृष्टवन्तः। धर्मोपदेशकः तदेव वचनं पुनः उच्चारितवान्। तदा तेषु अन्यतमः अवदत् – "भगवान् कस्यापि विषये करुणाहीनः भवितुं न अर्हति" इति।

एतत् श्रुत्वा धर्मोपदेशकः सकृत् म्लानमुखः जातः। प्रार्थना कथं करणीया, के च शब्दाः प्रयोक्तव्याः इति बोधनं तस्य कर्तव्यम् आसीत् खलु? अतः सः तान् अपृच्छत् – "मित्राणि! भवन्तः यदा प्रार्थनां कुर्वन्ति तदा कं क्रमम् आश्रयन्ति?" इति।

एतत् श्रुत्वा अपि ते परस्परं मुखं दृष्टवन्तः। तेषां प्रार्थनायाः क्रमः कोऽपि निश्चितः न आसीत्। धर्मबोधकः पुनः कांश्चन प्रश्नान् पृष्टवान्। ततः तेन ज्ञातं यत् ते द्वीपवासिनः – "देव! भवान् अपि अस्ति, वयमपि स्मः" इति प्रार्थनासमये वदन्ति इति।

"एतावदेव! मित्राणि! शान्तिं शक्तिं च प्राप्तुं कीदृशी प्रार्थना करणीया इति अहं बोधयिष्यामि। तदनुगुणम् एव आचरन्तु भवन्तः" इति अवदत् धर्मबोधकः। ते द्वीपवासिनः धर्मबोधकस्य कथनस्य श्रवणे अत्युत्सुकाः तु न आसन्। किन्तु तदीयस्य वचनस्य श्रवणे तेषां विरोधः अपि न आसीत्। ततः धर्मबोधकः ध्यानसमये कथम् उपवेष्टव्यम् इति, प्रार्थनायां के च शब्दाः प्रयोक्तव्याः इति च तान् विस्तरेण बोधितवान् घण्टाभ्यन्तरे।

यत् करणीयं तत् तृप्तिकररूपेण कृतम् इति चिन्तयन् धर्मबोधकः स्वस्य यात्राम् अनुवर्तितवान्।

सः नौकाचालकम् अवदत् – "जीवनयात्रा अपि नौकायात्रा इव। लक्ष्यं स्पष्टं न भवति चेत्

दीर्घप्रयाणानन्तरम् अपि किमपि न प्राप्येत। अतः जीवनयात्रायाः अपि लक्ष्यं स्पष्टं भवेत्'' इति।

''युक्तम् उक्तं भवता । यदि भवतः सम्पर्कः तैः न प्राप्तः स्यात् तर्हि तेषां जीवनस्य अग्रिमानि दिनानि व्यर्थतया यापितानि अभविष्यन्। भवतः दयया तैः लक्ष्यं प्राप्तमस्ति'' इति अवदत् नाविकः।

'अज्ञाः द्वीपवासिनः सुज्ञानिनः यथा स्युः तथा करणाय धर्मगुरुं द्वीपं प्रति नयता मया उत्तमं कार्यम् एव कृतम्' इति अचिन्तयत् सः।

सूर्यास्तः जातः। सर्वत्र अन्धकारः प्रसृतः अपि। रात्रेः अन्तिमे यामे समुद्रे महान्तः तरङ्गाः उत्पन्नाः। ते तरङ्गाः क्वचित् पर्वताकाराः अपि भवन्ति स्म। नौका अपायग्रस्ता जाता। नौकायाः समस्थितेः रक्षणाय नाविकेन महान् प्रयासः कृतः। सर्वे यत्नाः यदा विफलाः तदा नौकाचालकः धर्मबोधकम् अवदत् – ''गुरुवर्य ! इदानीं भवतः प्रार्थना एव अस्मान् रक्षितुम् अर्हति'' इति।

'प्रार्थनामात्रम् एव रक्षति' इति यद्यपि नाविकेन उक्तं तथापि आत्मना क्रियमाणायाः प्रार्थनायाः तादृशं सामर्थ्यं भवेत् इति धर्मबोधकस्य एव आत्मविश्वासः न आसीत्।

तथापि तेन किमपि करणीयम् आसीत् एव। अतः सः नौकातलं प्रति गतवान्। महती वृष्टिः, महान् वायुः च आसीत् तत्र। सः प्रार्थनां कर्तुम् उद्युक्तः जातः। मम प्रार्थना विफला जायमाना अस्ति इति अवगतं तेन।

अकस्मात् तस्य दृष्टिः पूर्वस्यां दिशि पतिता। क्षणाभ्यन्तरे तत्र मेघानाम् अपसरणं दृष्टम्। केषाञ्चित् आकाराणां कृते मेघाः मार्गं कल्पितवन्तः दृश्यन्ते स्म। मन्दे प्रकाशे ते आकाराः अस्पष्टतया दृश्यन्ते स्म। ते च आकाराः नौकाभिमुखम् एव आगच्छन्ति स्म। यथा यथा ते नौकासमीपम् आगताः तथा तथा वृष्टिः स्थगिता, वायोः तीव्रता अपि क्षीणा जाता। समीपम् आगच्छन्तः आकाराः मानवरूपाः इति धर्मबोधकेन अवगतम्। क्षणकालानन्तरं तरङ्गाणाम् उपरि पदं स्थापयन्तः अल्पवस्त्रधारिणः द्वीपवासिनः आगच्छन्तः दृष्टाः तेन। तेषां पवित्रात्मनाम् उपस्थित्या झञ्झावातवृष्ट्यादयः पूर्णतया स्थगिताः आसन्।

द्वित्रक्षणानन्तरं ते धर्मबोधकस्य समीपम् आगत्य उक्तवन्तः – ''आर्य ! भवता यत् बोधितं तत् वयं विस्मृतवन्तः स्मः। कृपया तत् पुनः उपदिशतु'' इति। जलस्य उपरि स्थितम् अस्ति इति, अत्यद्भुतं किमपि क्रियमाणम् अस्ति इति च ते सर्वथा न जानन्ति स्म। धर्मोपदेशकः जानुभ्याम् उपविश्य – ''मान्याः देवपुत्राः ! भवतां बोधनाय मया यत् उद्युक्तं तत् औद्धत्यं कृपया क्षन्तव्यं भवद्भिः। मया बोधः प्राप्तः अस्ति इदानीम्। कृपया क्षन्तव्यः अहम्। पापी अहं क्षन्तव्यः'' इति। ''मङ्गलमस्तु'' इति उक्त्वा ते द्वीपवासिनः वृद्धाः महता वेगेन प्रतिनिवृत्ताः जाताः। क्षणाभ्यन्तरे ते अदृश्यतां गताः अपि। धर्मबोधकः स्वस्य अज्ञानम् औद्धत्यं च स्मरन् पुनः पुनः विलपितवान्।

नौकातले किं प्रवृत्तम् इति अजानन् नौकाचालकः धर्मबोधकम् अवदत् – ''आर्य ! भवता अपूर्वम् एव साधितम्। झञ्झावातः पूर्णतः स्थगितः एव। महानुभावः भवान्'' इति। धर्मबोधकस्य दुःखम् एतस्य श्रवणात् अधिकं जातम्। अपूर्वस्य कृत्यस्य कर्तारः के इति सः एकः एव जानाति स्म। ये वस्तुतः देवस्वरूपाः आसन् तान् देवदर्शनाय मार्गम् उपदेष्टुं प्रयत्नः कृतः यत् तदर्थं महान्तं पश्चात्तापम् अनुभूतवान् सः।

## ग्रन्थपरिचयः ( कर्णभारम् )

व्योम शाहः

( अनुवर्तते)

कर्णः निश्चयं करोति यत् पाण्डवेभ्यः कष्टमुत्पाद्य, युधिष्ठिरं बद्ध्वा बाणानां च वेगेन अर्जुनं हत्वा अद्य पुनः शिबिरं गमिष्यामि। सः ततः शल्यराजेन सह रथम् अवरोहति अर्जुनस्य च सकाशं गन्तुम् आज्ञापयति।

तदैव ''महत्तरां भिक्षां याचे भोः कर्ण !'' इति वदन् ब्राह्मणरूपधारी इन्द्रः प्रविशति। विनयादि-औचित्यम् आचरन् कर्णः तम् आह्वयति। कर्णः तं नमस्करोति। इन्द्रः भ्रान्तः यत् तेन किं वक्तव्यम्? 'दीर्घायुर्भव' इति वक्तुं न शक्यते। यदि स एवं न वदिष्यति तर्हि मूढः इति कर्णः चिन्तयेत्। ब्राह्मणः वदति ''सूर्यः इव, चन्द्रः इव, हिमवान् इव, सागरः इव ते यशः तिष्ठतु'' इति। कर्णः शङ्कां करोति किन्तु ब्राह्मणेन प्रोक्तं शोभनम् एव इति विचिन्त्य दानार्थं परिपृच्छति। ब्राह्मणस्तु ''महत्तरां भिक्षां याचे'' इति वदति।

कर्णः धेनूनां सहस्रं दातुं पृच्छति। ब्राह्मणः न इति वदति। कर्णः अश्वानां सहस्रं दातुं पृच्छति। ब्राह्मणः तदपि न इच्छति। कर्णः अनेकान् गजान् दातुं पृच्छति। ब्राह्मणः 'न इच्छामि' इति वदति। एवमेव कर्णः क्रमशः बहु कनकं, सम्पूर्णां विजितां पृथिवीम्, अग्निष्टोमफलं, स्वस्य च शिरः दातुं पृच्छति। ब्राह्मणः न इत्येव वदति। कर्णः अङ्गैः सह एव जनितं कवचकुण्डलं दातुं पृच्छति। ब्राह्मणः सहर्षं स्वीकरोति। कर्णः चिन्तयति यद् एषः प्रपञ्चः कृष्णस्य एव स्यात्, तथापि तं ब्राह्मणाय दातुं शोकं न करोति। शल्यराजः उच्चैः वदति ''न दातव्यं न दातव्यम्'' इति। (अत्र शल्यराजं वारयितुं कर्णः विख्याताम् उक्तिं वदति। तद्यथा–

**शिक्षा क्षयं गच्छति कालपर्ययात् सुबद्धमूला निपतन्ति पादपाः।**
**जलं जलस्थानगतं च शुष्यति हुतं च दत्तं च तथैव तिष्ठति॥**

एवमुक्त्वा कर्णः कवचकुण्डलं ब्राह्मणाय ददाति। सः गृहीत्वा निष्क्रान्तः। शल्यः कर्णं कथयति यत् सः इन्द्रेण वञ्चितः। कर्णः प्रतिवदति यत् ''शक्रः मया वञ्चितः।'' कश्चित् देवदूतः ब्राह्मणरूपेण प्रविश्य पाण्डवेषु एकस्य वधार्थम् अमोघां 'विमला' नाम शक्तिं दातुम् गच्छति। कर्णः वदति यत् सः कदापि दत्तं न प्रतिगृह्णाति। देवदूतः ब्राह्मणवचनाद् गृह्णातु इति निवेदयति। ततः तौ पुनः रथम् आरुह्य अर्जुनं प्रति गच्छतः। नाट्यस्य समाप्तिः भरतवाक्येन भवति। –

**सर्वत्र सम्पदः सन्तु नश्यन्तु विपदः सदा।**
**राजा राजगुणोपेतो भूमिमेकः प्रशास्तु नः॥**

**कृतेः वैशिष्ट्यम् –**

– अयं सम्पूर्णः प्रसङ्गः महाभारते वनपर्वणि भवति, न तु मध्येयुद्धम्। इदं परिवर्तनं भासेन एव कृतम्।

– यद्यपि उत्सृष्टिकाङ्कस्य लक्षणस्य अनुगुणम् इह स्त्रीणां विलापः नास्ति तथापि अस्य कृतेः प्रकारः उत्सृष्टिकाङ्कः एव प्रतिभाति इति विदुषाम् अभिप्रायः।

– अस्मिन् अङ्के ब्राह्मणरूपधरः इन्द्रः प्राकृतां भाषां वदति, ते च संवादाः रसिकानां विनोदाय कल्पिताः भासेन।

– अनेन अङ्केन भासः कर्णस्य निर्मलं निरपराधं च व्यक्तित्वं प्रस्तौति। इत्यलं विस्तरेण।

( समाप्तम् )

## मासवार्ता

### सम्पन्नः संस्कृतगरबाकार्यक्रमः









एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं नवरात्रे संस्कृतगरबाकार्यक्रमस्य आयोजनं करोति। एतस्मिन् वर्षेऽपि ऑक्टोबरमासस्य २ दिनाङ्के सम्पन्नः भव्यः संस्कृतगरबाकार्यक्रमः । संस्कृत-साहित्य-अकादमी-गान्धिनगरस्य सहयोगेन आयोजितेऽस्मिन् कार्यक्रमे सहस्राधिकाः संस्कृतरसिकाः सोत्साहं संस्कृतगरबायाः आनन्दम् अन्वभवन्। परिश्रमेण आयोजितेऽस्मिन् विशिष्टे कार्यक्रमे मातुः नीराजनतः आरभ्य द्वितालगरबा, त्रितालगरबा, भाङ्गडा इत्यादीनि ५० गीतानि प्रस्तुतानि। श्रीधवलकुमारस्य धैर्या मांकडस्य च मार्गदर्शने अर्चना पटेलः, श्रीमती भावना रावलः, पारुल व्यासः, श्रीमती माधवी झाला, श्री जतीनः पटेलः च सवाद्यं सुमधुराणि गरबागीतानि अगायन्।

अत्र उल्लेखनीयं यत् संस्कृतभाषायाः प्रचाराय ऑक्टोबरमासस्य ५ दिनाङ्के संस्कृतविद्याप्रतिष्ठानम्, अमदावाद-संस्कृत-एकेडेमी, श्रीभागवतविद्यापीठं सोला च इत्येतेषां संयुक्तोपक्रमेण श्रीभागवतविद्यापीठे भव्यः संस्कृतगरबाकार्यक्रमः सम्पन्नः। कार्यक्रमेऽस्मिन् १५०० जनाः भागम् अवहन्। उभौ अपि कार्यक्रमौ सफलौ।

## कृपया हसन्तु

**भिक्षुक: - (यात्रिकम् उद्दिश्य) भो:, कृपया एकरूप्यकं ददातु । सप्ताहात् बुभुक्षित: अस्मि ।**

**यात्रिक: - यदि सप्ताहात् बुभुक्षित: असि तर्हि एकरूप्यकेण किं भविष्यति ?**

**भिक्षुक: - एकरूप्यकेण अहं मम भारं तोलयिष्यामि । कियान् न्यून: जात: इति ज्ञानं भविष्यति... ! !**

★ ★ ★ ★ ★

**बहुदिनानन्तरं रमण: उद्यानम् अगच्छत्, तत: गृहम् आगत्य स: पत्नीम् अवदत् - "किं त्वं जानासि ? जना: माम् ईश्वरं मन्यन्ते ।"**

**पत्नी - भवान् एतत् कथं ज्ञातवान् ?**

**रमण: - यदा अहम् उद्यानम् अगच्छं तदा मां दृष्ट्वा जना: अवदन् - "हे ईश्वर ! त्वं पुन: आगत: ?" इति ।**

★ ★ ★ ★ ★

**नमन: - (वैद्यम् उद्दिश्य) भो: वैद्यमहोदय ! मम वामपादे बहु पीडा वर्तते ।**

**वैद्य: - वयस: प्रभाव: अयम् ।**

**नमन: - किन्तु मम वामपादस्य दक्षिणपादस्य च वय: समानमेव अस्ति तर्हि केवलं वामपादे एव पीडा किमर्थं वर्तते ?**

## सुभाषितम्

**- संस्कृतविकिपीडियाजालस्थानात्**

**छिन्नोऽपि रोहति तरुश्चन्द्रः क्षीणोऽपि वर्धते लोके ।**
**इति विमृशन्तः सन्तः सन्तप्यन्ते न लोकेऽस्मिन् ॥**

**तात्पर्यम्**– छिन्नं चेदपि सस्यं वर्धते। चन्द्रः क्षीणः भवति चेदपि पुनः वर्धते। सः पुनः आकाशे विराजते। एवं चिन्तयन्तः सज्जनाः अस्मिन् लोके व्यर्थतया दुःखं न अनुभवन्ति।

**जनिता च उपनेता च यश्च विद्यां प्रयच्छति ।**
**अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥**

**तात्पर्यम्**– समाजेऽस्मिन् माता, उपनेता अर्थात् यः अस्मान् अग्रे नयति, यः अस्मभ्यं विद्यां प्रयच्छति, यः अस्मभ्यम् अन्नं ददाति, यः अस्मान् भयात् त्रायते एते पञ्च पितृरूपेण स्मर्यन्ते।

**जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।**
**स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥**

**तात्पर्यम्**– एकैकः जलबिन्दुः पतति चेदपि घटः क्रमशः पूर्णः भवति। विद्यायाः, धर्मस्य, धनस्य च सम्पादने इदं दृष्टान्तं सदा स्मर्तव्यम्।

## ज्ञानसरित्

श्यामः पटेलः

**शीतकाले अत्र तत्र सर्वत्र पीनसः** – वयं जानीमः यत् शीतकाले वातावरणे किञ्चित् परिवर्तनं वा भवति तदा अस्माकं नासिकायां पीनसः भवति। नासिकायां कण्ठे मूर्धनि च कफः स्वसाम्राज्यं स्थापयति। सः एव पीनसः इति लोके प्रसिद्धः अस्ति। सामान्योपचारेण रोगप्रतिकारशक्त्या वा द्वित्रेषु दिनेषु एव पीनसः निवारितः भवति। किन्तु पीनसः सञ्चारी रोगः अस्ति। पीनसग्रस्तस्य जनस्य उच्छ्‌वासेन जवेन सञ्चरति अयं रोगः। यदा कश्चन कासते तदा पीनसस्य जीवाणवः प्रतिघण्टं १०० किलोमीटरपरिमितस्य वेगेन तथा च यदा कश्चन क्षौति तदा प्रतिघण्टं १६० किलोमीटरमितस्य त्वरया परिसञ्चरन्ति। अतः रोगप्रतिकारत्वं यस्मिन् न्यूनं भवति सः एव झटिति पीनसग्रस्तः भवति। गृहे, विद्यालये, कार्यालये, कार्यक्रमेषु वा एकेन पीनसग्रस्तेन जनेन बहवः जनाः पीनसाय निमन्त्रणं यच्छन्ति। अतः एतादृशं सञ्चारिणं रोगं निवारयितुं कासनसमये क्षवणकाले च मुखनासिकयोः उपरि स्वच्छवस्त्रस्य आच्छादनम् अपेक्षितम्। येन पीनसस्य जीवाणवः पर्यावरणे प्रसारिताः न भवितुम् अर्हन्ति। किन्तु अत्रैव वयं प्रमादं कुर्मः। एवं तु एषः सामान्यः रोगः अस्ति। किन्तु एतस्य प्रभेदेभ्यः अन्यतमः ''स्वाइन फ्लु'' नामकः रोगः अस्माकं प्रमादत्वात् एव बहुवर्षेभ्यः जनान् मारयति। इतिदिक्।

पीनसः – cold affecting the nose, सञ्चारी – contagious

कासनम्/ कासते – cough, क्षवणम् /क्षोति – sneeze

## शब्दमञ्जूषा

| | |
|---|---|
| **क्षिप्या** | pitch |
| **वीटा, वैटः** | bat |
| **गेन्दुः, कन्दुकम्** | ball |
| **स्तोभः** | wicket |
| **स्तोभरक्षः** | wicket keeper |
| **अवक्षिप्तम्** | short pitched |
| **गृहीतः** | caught out |
| **स्तोभितः** | stumped out |
| **धाविन्नष्टः** | run out |
| **गेन्दितः** | bowled out |
| **पादबाधा** | lbw |
| **अपगेन्दुः** | wide ball |
| **नोगेन्दुः** | no-ball |
| **चतुष्कम्** | four runs |
| **षट्कम्** | sixer |

## किं भवन्तः जानन्ति ?

**१ ) एतेषु कस्य यज्ञस्य आरम्भः पवित्रनामकेन सोमयज्ञेन समाप्तिः सौत्रमणियज्ञेन च भवति ?**
(क) अश्वमेधः (ख) राजसूयः (ग) विश्वजित् (घ) वैष्णवः

**२ ) एतेषु कः ऋषिः नारायण ! नारायण ! इति जपन् त्रिषु लोकेषु विचरति ?**
(क) अगस्त्यः (ख) वाल्मीकिः (ग) याज्ञवल्क्यः (घ) नारदः

**३ ) पितॄणां पिण्डदानाय एतेषु किं तीर्थं प्रसिद्धं वर्तते ?**
क) प्रयागतीर्थम् (ख) गयातीर्थम् (ग) पुष्करतीर्थम् (घ) अयोध्यातीर्थम्

**४ ) समुद्रमथनात् निर्गतस्य अश्वस्य नाम किं वर्तते ?**
(क) चेतकः (ख) ऐरावतः (ग) वाजिः (घ) उच्चैःश्रवा

**५ ) अश्वमेधयज्ञस्य अश्वस्य मस्तकस्य उपरि यत् पत्रं स्थाप्यते स्म। तस्य नाम किम् आसीत् ?**
(क) रणपत्रम् (ख) विजयपत्रम् (ग) जयपत्रम् (घ) घोषपत्रम्

**६ ) गङ्गानद्याः उद्गमस्थानस्य नाम किं वर्तते ?**
(क) गङ्गामुखम् (ख) गङ्गोत्री (ग) मन्दाकिनी (घ) यमुनोत्री

**७ ) यमुनानद्याः उद्गमस्थानस्य नाम किं वर्तते ?**
(क) गङ्गोत्री (ख) यमजा (ग) यामिनी (घ) यमुनोत्री

उत्तराणि – (१) ख (२) घ (३) ख (४) घ (५) ग (६) ख (७) घ

## अस्माकम् आगामिकार्यक्रमाः


EKLAVYA SANSKRIT ACADEMY
।।जयतु संस्कृतं जयतु भारतम्।।

**Online**

**Admission Open**

# संस्कृतभाषाशिक्षणम्

**Second Level**

**Date :** 7/11/22 to 6/2/23
**Day :** Mon-Wed-Fri
**Time :** 7:30am to 9:00am
**Fees :** 5000/-

EKLAVYA SANSKRIT ACADEMY
।।जयतु संस्कृतं जयतु भारतम्।।

**Online / Offline**

**Admission Open**

# संस्कृतभाषाशिक्षणम्

**First Level**

**Date :** 7/11/22 to 6/2/23
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 5000/-

## दीपावलीवर्गः

**Sanskrit Grammer (Cl 9 & 10)**

**Date :** 1/11/22 to 8/11/22
**Day :** Daily
**Time :** 9:00 am to 10:30 am (IST)
**Fees :** 2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**


## संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।


**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

एतस्मिन् नूतने वर्षे –

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥

## सर्वेभ्यः पाठकेभ्यः
## नूतनवर्षाभिनन्दनानि ।



– सम्पादकः

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।


EKLAVYA SANSKRIT ACADEMY
।।जयतु संस्कृतं जयतु भारतम्।।

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy


Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org


Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006